# श्री सुरसरस्वती सभा शृङ्गेरि

## प्रवेशपरीक्षा

## प्रथमपत्रिका

दिनाङ्कः – २९-०१-२०१२ अङ्काः–१००

पूर्वाह्णे – १०-०० तः १-०० पर्यन्तम् समयः–घण्टात्रयम्

**1 अष्टानाम् एकवाक्येन उत्तरं लिखत :-** 8

१. कोपकलुषिता मतिः किं न विमृशति ?

२. अमरावत्यां वर्तमानस्य प्रासादस्य नाम किम् ?

३. भीष्मानुसारेण बहुषु धर्मेषु राज्ञां को धर्मः विशिष्यते ?

४. अतिस्नेहः कीदृशी ?

५. इन्द्रजिता नीतः हनूमान् कीदृशं रावणं ददर्श ?

६. माघे सन्ति त्रयो गुणाः – ते के ?

७. सरस्वत्याः शापः कः समयपर्यन्तं तिष्ठति ?

८. शकुन्तलायै दूर्वाससा दत्तः शापः कथं निवृत्तो भवति ?

९. मन्त्रसभायां के के स्थिताः ?

१०. चम्पूरामायणं केन विरचितम् ?

११. कृतान्तदेहलीं के यान्ति ?

१२. कस्मिन् वत्सरे श्रीशङ्करस्य उपनयनं अभवत् ?

**2 रिक्तस्थानानि पूरयत :-** 5

१. राजशब्दोऽपि ........................ विना कथं अर्थवान् भवति ?

२. महीयांसः प्रकृत्या ........................।

३. न भवति किं ........................ ।

४. भूषणाद्युपभोगेन ........................ ।

५. पीड्यन्ते गृहिणः कथं नु ........................ नवैः ।



पश्चादनुवर्तते

**3 षण्णां त्रिचतुरैर्वाक्यैरुत्तरं लिखत :-** 18

१. युधिष्ठिरेण कीदृशः कृष्णः दृष्टः ?

२. मतेः पुरुषोत्तम एव पतिरिति कविः कथं वर्णवति ?

३. उपनयनानन्तरम् श्रीशङ्करावटोः अध्ययनवैभवं वर्णयत ।

४. उद्धवरामौ प्रति श्रीकृष्णस्य वचनं वर्णयत ।

**4 त्रयाणां सप्रसङ्गं विवरणं कुरुत :-** 9

१. क इदानीमुष्णोदकेन नवमालिकां सिञ्चति ।

२. स्वयमनभियुक्तानां राज्ञामेते दोषाः सम्भवन्ति ।

३. अतिमृदोर्मस्तकमारोहति हस्तिन इव इस्तिपकः ।

४. क्षमा हि मूलं सर्वतपसाम् ।

५. न हि यमोऽस्य कृताकृतमीक्षते ।

**5 श्लोकद्वयस्य सान्वयार्थं लिखत :-** 8

१. रम्यान्तरः कमलिनी भरितैस्सरोभि -
शछायाद्रुमैर्नियमितार्कमयूखतापः ।
भूयात् कुशेशयरजोमृदुरेणुरस्या–
श्शान्तााानुकूलपवनश्च शिवाश्च पन्थाः ।।

२. गुरुद्वयाय गुरुणोरुभयोरथ कार्ययोः ।
हरिर्विप्रतिषेधं तमाचचक्षे विचक्षणः ।।

३. शिखां मोक्तुं बद्धामपि पुनरयं धावति करः
प्रतिज्ञामारोढुं पुनरपि चलत्येव चरणः ।
प्रणाशान्नन्दानां प्रशममुपयातं त्वमधुना
परीतः कालेन ज्वलयसि मम क्रोधदहनम् ।।

**6** **पद्यद्वयं पूर्णं लिखत :-** 8

१. दिव्यधुनी ......................... वन्दे ।

२. त्वदङ्ध्रिफुल्लाम्बु ....................... तृणाय मन्यते ।

३. महाजवाश्छिन्न ....................... सुशीलताम् ।

**7** **अनयोरन्यतरस्य कवेः देशकालकृतिवैशिष्टष्यि विषये संस्कृतेन लिखत :-** 6

१. लक्ष्मणसूरिः २. बाणभट्टः

**8** **चतुर्णां रूपाणि परिचाययत :-** 4

१. वाचा २. सोढुम् ३. पुरस्कृत्य

४. हित्वा ५. भवितव्यः

**9** **चत्वारि पदानि वाक्ये योजयत :-** 4

१. अनुत्सेकिनी २. शिलीमुखः ३. विभावरी

४. सपदि ५. क्षमा

**10** **द्वयोर्व्याकरणविशेषं लिखत :-** 4

१. दुर्मेधसः २. विषादं मा गाः ३. नमस्यन्

**11** **चतुर्णां पर्यायपदानि लिखत ।** 4

१. अमित्रः २. अर्कः ३. इष्टिः

४. गजः ५. आपः

**12** **चतुर्णां सन्धिं विभज्य नाम लिखत :-** 4

१. वाङ्मयम् २. प्रत्यभाषत

३. तज्जगत् ४. वनेऽस्मिन्



पश्चादनुवर्तते

**13** **चतुर्णां एकं पदं लिखत :-** 4

१. वनम् ओकः एषां ते ।

२. नगं भिनत्ति इति ।

३. द्वे जन्मनी एषां ते ।

४. समुद्रस्य इदम् ।

४. स्नातुं इच्छुः ।

**14** **चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत :-** 8

| | | |
|---|---|---|
| १. अविकत्थनाः | २. आपन्नसत्त्वा | ३. मासोपवासिनः |
| ४. जामदग्निः | ५. द्वित्राः | ६. शान्तनवः |

**15** **द्वयोस्तत्तल्लकारस्य सर्वाणि रूपाणि लिखत :-** 6

| | |
|---|---|
| १. बभूव | २. शाधि |
| ३. श्रृणोति | ४. याहि |

* * * * *

# श्री सुरसरस्वती सभा शृङ्गेरि

## प्रवेशपरीक्षा

### द्वितीयपत्रिका

दिनाङ्कः – २९-०१-२०१२ अङ्काः–५०

अपराह्णे – १-३० तः ३-०० पर्यन्तम् समयः–सार्धैकहोरा

**1 द्वावुत्तरयत :-** 8

१. धातोः तव्यप्रत्ययः आनीयर्प्रत्ययश्च कस्मिन् अर्थे भवन्ति ? वाक्यरूपैः त्रिभिरुदाहरणैः विशदीकुरुत ।

२. धातूनां कति गणाः ? तान् निर्दिश्य तेषां विकरणप्रत्ययानि लिखत ।

३. शतृ - शानच् प्रत्ययौ – उदाहरणपूर्वकं विवृणुत ।

**2 चतुर्णां वाक्यानां प्रयोगं व्यत्यस्यत :-** 4

१. बालिकाभिः गीतानि गीयन्ते । २. शल्यराज, मम रथं चोदय ।

२. विद्वांसः स्वदेशे परदेशे च पूज्यन्ते । ४. अस्यां शालायां छात्रैः संस्कृतभाषा पठ्यते ।

५. त्वं वस्त्राणि क्रीणीहि । ६. भक्तेन भगवान् वरान् याच्यते ।

**3 द्वावुत्तरयत :-** 8

१. अव्ययीभावसमासं सोदाहरणं विवृणुत ।

२. दीपकस्य लक्षणं सोदाहरणं विशदयत ।

३. शालिनीं – सलक्षणं सप्रस्तारं निरूपयत ।

**4 त्रयाणां तत्तल्लकारस्य सर्वाणि रूपाणि लिखत :-** 9

१. अत्ति २. हन्तु ३. दोग्धि ४. एधि ५. दुदोह

**5 त्रयाणामन्यलिङ्गरूपाणि लिखत :-** 3

१. श्रोता २. दृष्टवती ३. सहमाना ४. कुर्वाणः ५. देयः

**6 त्रयाणां विग्रहं विलिख्य समासनाम लिखत :-** 3

१. शाकपार्थिवः २. अनश्वः ३. गुरुदक्षिणा ४. राजपुरुषः ५. पञ्चगवम्

**7 मातृभाषया अनुवादं कुरुत । (पञ्चानामेव)** 5

१. भगवान् रसात्मकः सोमो भूत्वा सर्वाः औषधीः पुष्णाति ।

२. किं ते अभिष्टा प्रदद्याम् शीघ्रं ब्रूहि ।



पश्चादनुवर्तते

३. साधुवेषधारिभिः चोरैः बहवो धनिकाः धनानि अमुष्यन्त ।

४. संतप्तायसि संस्थितस्य पयसो नामापि न श्रूयते ।

५. हनूमान् मध्येसमुद्रं सहसा समुत्थितं पर्वतमेकमपश्यत् ।

६. दूरसंपर्कसाधनेषु दूरदर्शनमत्यन्तं प्रमुखमस्ति ।

७. छात्राः भक्त्या आचार्यं प्रणम्य ततः अध्ययने प्रवर्तन्ते ।

**8 पञ्चानां संस्कृतेन अनुवादं कुरुत :-** 5

1. ಶೂರರು ಉತ್ಸಾಹದಿಂದ ಯುದ್ಧಭೂಮಿಗೆ ಹೋದರು.
   Valiant men went to the battle field with enthusiasm.
2. ಕವಿಗಳು ಮಹಾತ್ಮರ ಕೀರ್ತಿಯನ್ನು ಎಲ್ಲ ದಿಕ್ಕುಗಳಲ್ಲೂ ಹರಡುತ್ತಾರೆ.
   Poets spread the fame of great men in all directions.
3. ನಾನು ಸಿಹಿಯಾದ ಹಣ್ಣುಗಳನ್ನು ತಿನ್ನಲು ಬಯಸುತ್ತೇನೆ.
   I wish to eat sweet fruits.
4. ಯಮುನಾನದಿಯ ತೀರದಲ್ಲಿ ಕೃಷ್ಣನು ವೇಣುಗಾನವನ್ನು ಮಾಡಿದನು.
   Krishna played flute on the banks of Yamuna river.
5. ಕಷ್ಟಬಂದರೂ ವಿವೇಕವನ್ನೂ ಧೈರ್ಯವನ್ನೂ ಜನರು ಬಿಡಬಾರದು.
   Even during adversity, people should not leave the power of discrimination and courrage.
6. ಕಳ್ಳರು ನಮ್ಮ ಬಾಳೆತೋಟದಲ್ಲಿ ಎಲ್ಲ ಬಾಳೆಗಿಡಗಳನ್ನು ಕತ್ತರಿಸಿದರು.
   The thieves have cut the Banana plants in our Banana garden.
7. ಮಾಲಿಕನು ತೋಟದಲ್ಲಿ ಸೇವಕರಿಂದ ಗಿಡಗಳನ್ನು ನೆಡಿಸಿದನು.
   The lord got the plants planted in the garden.

**9 संस्कृतेनानुवादं कुरुत :-** 5

ಧಾರಾನಗರದಲ್ಲಿ ಭೋಜನೆಂಬ ರಾಜನಿದ್ದನು. ಅವನ ಆಸ್ಥಾನದಲ್ಲಿಯ ಶ್ರೇಷ್ಠಕವಿಗಳಲ್ಲಿ ಕಾಳಿದಾಸನು ರಾಜನಿಗೆ ಅತ್ಯಂತ ಪ್ರಿಯನಾಗಿದ್ದನು. ಭೋಜರಾಜನು ತನ್ನ ಮರಣೋತ್ತರ ಶ್ಲೋಕವನ್ನು ರಚಿಸಲು ಕಾಳಿದಾಸನಿಗೆ ಹೇಳಿದನು. ಕುಪಿತನಾದ ಕಾಳಿದಾಸನು ಏಕಶಿಲಾ ಎಂಬ ಪಟ್ಟಣಕ್ಕೆ ಹೋದನು. ಭಿಕ್ಷುಕ ವೇಷವನ್ನು ಧರಿಸಿ ಕಾಳಿದಾಸನನ್ನು ಶೋಧಿಸಲು ಹೊರಟು ರಾಜನು ಏಕಶಿಲಾ ಪಟ್ಟಣದಲ್ಲಿ ಕಾಳಿದಾಸನನ್ನು ನೋಡಿದನು. ರಾಜನು ಸತ್ತುಹೋದನು ಎಂದು ಹೇಳಿದನು. ಆಗ ಕಾಳಿದಾಸನ ಮುಖದಿಂದ ಮರಣೋತ್ತರ ಶ್ಲೋಕವು ಸಹಜವಾಗಿ ಹೊರಬಿದ್ದಿತು. ಆಗ ಅರಸನು ತನ್ನ ನಿಜರೂಪವನ್ನು ತೋರಿದನು. ರಾಜನ ಇಚ್ಛೆ ಪೂರ್ತಿಯಾಯಿತು.

There lived a king by name Bhoja in Dhara city. Among the great poets in his royal court, Kalidasa was very dear to him. Bhoja asked Kalidasa to write an obituary verse on him. Enraged Kalidasa went away to the city Ekasila. Wearing the dress of a begger, king went in search of Kalidasa and saw Kalidasa in the city Ekasila. He said that the king had expired. Then spontaneously an obituary verse came out from the mouth of Kalidasa. Then the king appeared in his natural form and his desire was fulfilled.